त्रिरात्रकम्। वेदवेदाङ्गशास्त्राणां व्याख्यानं शिक्षितं यतः। ज्ञानं प्रतिष्ठितं येन वेदाभ्यासोयतः कृतः। तस्मिन्मृते चैकरात्रं गुरोःशिष्ये तथैव" च मनुस्मृत्युक्तेः दत्तक पुत्रस्य गृहीत्रादिकुले त्रिरात्रम् जनककुलेऽशौचाभावः। तत्रायं विशेषः। सपिण्डदत्तकस्यापि त्रिरात्रं वाचनिकं तत्पुत्रादीनां तु संपूर्णमिति।असपिण्डदत्तकस्य तत्पुत्राणाञ्च त्रिरात्रमिति बहवः सपिण्डासपिण्डदत्तकतत्पुत्राणां त्रिरात्रमिति "भिन्नगोत्राः पृथक्पिण्डाः पृथग्वंशकराः स्मृताः। जनने मरणे चैव त्र्यहाशौचस्य भागिनः" इत्युक्तेरिति दत्तकमीमांसादयः। शवानुगमनाशौचम्।ब्राह्मणशवस्यानुगमने ब्राह्मणस्य सचेलस्नानाग्निस्पर्शघृतप्राशनैः शुद्धिः।क्षत्रियस्यैकाहेन, वैश्यस्य द्व्यहेन, शूद्रस्य प्राणायामशतेन दिनत्रयेण च शुद्धिः। प्रमादाच्छूद्रशवानुगमने जलावगाहाग्निस्पर्शघृतप्राशनैः शुद्धिः। अनाथब्राह्मणस्य धर्मबुद्ध्या दहनवहनयोः स्नानघृतप्राशनाभ्यां सद्यः शौचम्। लोभेन सजातीयदाहे स्वजात्युक्ताशौचम्। असजातीयशवस्य दहनवहनस्पर्शैः शवजात्युक्ताशौचम्। स्नेहादसम्बन्धिदाहकविप्रस्य तद्गृहवासे त्रिरात्रं तत्कुलान्नभोजने दशरात्रं तद्गृहवासे तदन्नाभोजने चाहोरात्रं विशेषवचनाभावे सम्बन्धिनोमातुलादेरस्नेहेनापि अदाहे त्रिरात्रं चिताधूमसेवने सचेलस्नानं मृते शूद्रेऽस्थिसञ्चयनकालाभ्यन्तरे तद्गृहं गत्वाऽश्रुपातने विप्रस्य त्रिरात्रमशौचं, स्थानान्तरे विशेषवचनाभावेऽहोरात्रं तद्गृहे तदूर्द्ध्वं मासाभ्यन्तरेऽहोरात्रं सचेलस्नानञ्च। सजातेर्द्दिवसेनैव क्षत्रियवैश्ययोर्द्व्यहेन ब्राह्मणः शुध्यति शूद्रस्तु स्पर्शं विनानुगमने सर्वत्र नक्तेन। मृतस्य शूद्रस्य बान्धवैः सह रोदनरहितविलापमात्रेऽहोरात्रेण। अस्थिसञ्चयनकालस्य ब्राह्मणस्य चतुरहः शूद्रस्य दशाहः। त्र्यहाशौचे द्वितीयाहः।मरणाशौचे विप्रस्य चतुर्थाहेऽस्पृश्यतानिवृत्तिः। शूद्रस्य दशमदिने सर्वस्य खण्डाशौचकाले विभागकालेन अतिक्रान्ताशौचे सचेलस्नानेन जनने तु सपिण्डानां स्पृश्यतैव।पुत्रोत्पत्तौ स्नानात् पितुः स्पृश्यत्वं एवं विमातॄणामपि। एवं सूतिकास्पर्शे पितुर्विमातॄणाञ्च सूतिकातुल्यकालास्पृश्यत्वम्। अन्येषां स्नानमात्रं कन्या पुत्रजनने मातुर्द्दशरात्रमङ्गास्पृश्यत्वं शूद्रायास्तु दशरात्रमस्पृश्यत्वम्। अशौचकालादिविषये च प्रायोनिबन्धकर्त्तॄणां मतभेदोदृश्यते बाहुल्यभयात् तन्न लिखितम् स्वदेशप्रचलितनिबन्धानुसारेण तदवसेयम्। अशौचे तु वर्णादि विशेषादौ दश पक्षा हारलतायां दक्षेणोक्ताः यथा "सद्यःशौचं तथैकाहस्त्र्यहश्चतुरहस्तथा। षड्दश द्वादशाहश्च पक्षोमासस्तथैव च। मरणान्तं तथा चान्यत् दश पक्षास्तु सूतके"। तत्र मरणान्तं जननमरणभिन्ननिमित्तम्।यथा "क्रियाहीनस्य मूर्खस्य महारोगिण एव च। यथेष्टाचरणस्याङ्गमरणान्तमशौचकम्" शु०त० स्मृतिः।"अस्नात्वा चाप्यहुत्वा च अदत्त्वाऽन्नं तथा द्विजः। एवंविधस्य विप्रस्य सर्व्वदा सूतकं भवेत्" दक्षः "अन्यपूर्व्वा यस्य गेहे भार्य्या स्यात्तस्य नित्यशः। अशौचं सर्व्वकार्य्येषु देहे भवति सर्व्वदेति" नि०सि०स्मृतिः "मरणान्तपक्षस्तु निन्दार्थवादपरः "नामधारकविप्रस्तु दशाहं सूतकी भवेदिति" माधवधृतवचने नामधारकविप्रस्यापि दशाहाशौचविधानात्" नि०सि०। दासाद्यशौचे विशेषः तत्र दासाः पञ्चदशधा दासशब्दे वक्ष्यमाणास्तेषु गर्भदासस्य सपिण्डान्तरजननमरणयोः स्वामिकार्य्ये सद्यः शौचं भक्तदासस्य त्र्यहः "सद्यःस्पृश्यो गर्भदासो भक्तदासस्त्र्यहाच्छुचिः"नि०सि०स्मृत्युक्तेः कर्म्मकरदासानां विशेषः"मूल्यैः कर्म्मकराः शूद्रा दासीदासास्तथैव च।स्नाने शरीरसंस्कारे गृहकर्म्मण्यदूषिताः" शाता० उक्तः। दत्तदासदास्यादीनां तु "दासी दासश्च सर्व्वोवै यस्य वर्णस्य यो भवेत्। तद्वर्णस्य भवेच्छौचं दास्या मासन्तु सूतकम्"अङ्गि० "स्वामिशौचेन दासाद्याः स्पृश्याः मासात्तु कर्म्मसु। योग्याः स्युर्मासितोदासी सूतके स्पृश्यतामियात्" षट्त्रिं०। दत्तदासादीनां सपिण्डमरणादौ स्वाम्यशौचसमसंख्यकदिनादूर्द्ध्वम् सत्यपि मासाद्यशौचे स्वामिकार्य्ये स्पृश्यतेति हरदत्तः एवमन्तेवासिनामपि। "दासान्तेवासिभृतकाः शिष्याश्चैकत्रवासिनः। स्वामितुल्येन शौचेन शुध्यन्ति मृतसूतके" इह० उक्तेः। दासादेः स्वामितत्सपिण्डमरणेऽशौचमाह विष्णुः "पत्नीनां दासानामानुलोम्ये स्वामितुल्यमशौचं मृते स्वामिन्यात्मीयम्" अत्रानुलोम्येनेत्युक्तेः प्रातिलोम्येऽशौचाभाव एव तस्य शास्त्रीयदासत्वाभावात् "वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः" इति याज्ञ० स्मृत्या प्रातिलोम्येन दासत्वनिषेधात्। "सूतकानां परिच्छेद इत्यादि सू०सि० प्रागुक्तवचनात् सावनदिनस्यैव ग्राह्यता।मिताक्षराकृता तु रात्रिं विभागं कृत्वाद्यभागद्वये चेत् पूर्व्वदिनम्, अन्त्ये चेत् परदिनमिति आरम्भकाले विशेष उक्तः।प्रागर्द्धरात्रात् प्रागेवा सूर्य्योदयात् पूर्व्वदिनमिति मतान्तरम्। एतेषु देशाचारतो व्यवस्था। अशौच्यन्नभक्षणेऽपि तत्तुल्य-